No. ५९६७५ घ

Title कालीकल्पे वैरिनाशकवचम्

Author +

Extent ३ Age +

Subject तन्त्रम् . संपूर्णम्

#=5655
F-3

नं० ५६६७५-घ Complete

Dr

कालीकल्पे वैरिनाशकवचम्

पत्राणि ३ (त्रीणि)

नं० १२१५

नं० ५६६५-घ
कालीकल्पे वैरिनाश कवचम् (त
पत्राणि ३ (त्रीणि)

नं. १२२९५ क
कालीकवचं वैरीनाश-



कालिकवचं वैरिनाशकम्

५९
१६

नं० १२२९५

क॰ ॐश्रीगणेशायनमः ॐनमःपरदेवतायै ॐकैलासशि
का॰ खरासीनंदेवदेवंजगद्गुरुं शंकरंपरिपप्रच्छपार्वतीपरमेश्व
१ रं १ श्रीपार्वत्युवाच भगवन्देवदेवेशदेवानांभोगदप्रभो
प्रब्रूहिमेमहादेवगोप्यंयद्यपिचप्रभो २ शत्रूणांयेननाशः
स्यादात्मनोरक्षणंभवेत् परमैश्वर्यमतुलंलभेद्येनहितंवद
३ भैरवउवाच वक्ष्यामितेमहादेविसर्वधर्मविदांवरे अद्भु
तंकवचंदेव्याः सर्वकामप्रसाधकं ४ विशेषतःशत्रूनाश
करंरक्षणंशुभावहं सर्वारिष्टप्रशमनमभिचारविनाशनं ५
सुखदंभोगदंचैववशीकरणमुत्तमं शत्रूसंघाःक्षयंयांतिभ
वंतिव्याधिपीडिताः ६ दुःखिनांज्वरिणांश्चैवस्वाभीष्टप्रच्युता

न्तथा ॐ अस्य श्रीकालिकाकवचस्य भैरवऋषिः अनुष्टु
प्छंदः श्रीकालिकादेवता शत्रुसंघनाशेविनियोगः अथ
ऋष्यादिन्यासः भैरवऋषयेनमः शिरसि अनुष्टुप्छंदसे
नमो मुखे श्रीकालिकादेवतायेनमः हृदि शत्रुसंघनाशे
विनियोगः सर्वांगेषु अथकरन्यासः क्रांअंगुष्ठाभ्यांनमः
क्रींतर्जनीभ्यांस्वाहा क्रूंमध्यमाभ्यांवषट् क्रैंअनामिकाभ्यांहुं
क्रौंकनिष्ठिकाभ्यांवौषट् क्रः करतलकरपृष्ठाभ्यांफट् अथहृ
दयादिन्यासः क्रांहृदयायनमः क्रींशिरसेस्वाहा क्रूंशिखाये
वषट् क्रैंकवचायहुम् क्रौंनेत्रत्रयायवौषट् क्रः अस्त्रायफ
ट् इतिषडंगन्यासः ॐध्यायेत्कालींमहामायांत्रिनेत्रांबहुरूपि

का॰
का॰
२

णीं ८ चतुर्भुजां ललज्जिह्वां पूर्णचंद्रनिभाननां नीलोत्पल
दलप्रख्यां शत्रुसंघविदारिणीं ९ कमलं च तथा खड्गं करवा
लं करं तथा त्रिनेत्रां रक्तवदनां दंष्ट्रालीं घोररूपिणीं १० अट्टा
ट्टहासनिरतां सर्वदा च दिगंबरां शवासनस्थितां देवीं मुंड
मालाविभूषितां ११ इति ध्यात्वा महाकालीं ततस्तु कव
चं पठेत् कालिका घोररूपास्या सर्वकामप्रदा शुभा १२ सर्व
देवस्तुता देवी शत्रुनाशं करोतु मे ॐ ह्रांह्रीं स्वरूपिणीं चैव
ह्रींह्रांह्रूं सः स्वरूपिणीं १३ ह्रांह्रींह्रौं ह्रः सः स्वरूपा सदा
शत्रून् प्रणाशतु मे श्रीं ह्रीं ऐं रूपिणी देवी भवबंधविमोचिनी १४
ह्सकलह्रीं रिपून् साहंतु सर्वदा ययाशुंभो हतो दैत्यो निशुं-

भक्षमहासुरः १५ वैरिनाशायवंदेतांकालिकाशंकरप्रियां
ब्राह्मीशैवीवैष्णवीचवाराहीनारसिंहिका १६ कौमारीश्रीच
चामुंडाखादंतुममविद्विषः सुरेश्वरीघोररूपाचंडमुंडविना-
शिनी १७ मुंडमालावृतांगीचसर्वतःपातुमांसदा क्रांक्रींका
लिकेघोररूपेघोरदंष्ट्रेरुधिरप्रिये १८ रुधिरपूर्णवक्त्रेरु
धिरावृत्तस्तनि ममशत्रून्खादय २ हिंस २ मारय २ छिं
भिंद्धि २ छिंद्धि २ उच्चाटय २ द्रावय २ शोषय २ स्वाहा रां
रींकालिकायैमदीयशत्रून्समर्पयामिस्वाहा जय २ कि
रि २ किटि २ कटु २ मर्दः २ मोहय २ हर २ ममरिपून्
ध्वंसय २ भक्षय २ त्रोटय २ यातुधानेचामुंडेसर्वजनान्

का॰
का॰
३

3

राज्ञोराजसुतरूषान् स्त्रियोममवश्यान्कुरु २ तुरु २ धान्यं
धनमश्वान्गजान्रत्नानिदिव्यकामिनी पुत्रान्राजश्रियंदेहि
यच्छ यच्छ ह्रांह्रींह्रूंह्रैंह्रौंह्रः स्वाहा इत्येतत्कवचंदिव्यंकथितंशं
भुनापुरा येपठंतिसदातेषांध्रुवंनश्यतिशत्रवः वैरिणः प्रल
यंयांतिव्याधिताचाभवंतिहि बलहीनापुत्रहीनाशत्रवस्तस्य
सर्वदा सहस्रपठनात्सिद्धिःकवचस्यभवेत्तथा तत्कार्याणि
चसिद्ध्यंतियथाशंकरभाषितं श्मशानांगारमादायचूर्णं
कृत्वाप्रयत्नतः पादोदकेनपिष्ट्वाचलिखेल्लोहशलाकया ।
भूमौशत्रूहीनरूपाउत्तराशिरसस्तथा हस्तंदत्तिणंकृत्वायेक
वचंतद्हृयंपठेत् शत्रोः प्राणप्रतिष्ठांचकुर्यात्मंत्रेणमंत्रवित्

हत्यादस्त्रप्रहारेण शत्रूर्गच्छेद्यं मत्त्वयं ज्वलदंगारतापेन भवं
तिज्वरिताभ्रुशं प्रोक्षणे वामपादेन दरिद्रोपतिताध्रुवं वैरि
नाशकरं प्रोक्तं कवचं वश्यकारकं परमैश्वर्यदं चैव पूजाका
ले च यत्नतः सायंकाले तथा पाठात् सर्वसिद्धिर्भवेद्ध्रुवं श
त्रुरुच्चाटनं याति देशाच्च विच्युतो भवेत् पश्चात्किंकरतामे
ति सत्यं सत्यं न संशयः शत्रुनाशकरे देवि सर्वसंपत्करे भवे
त् सर्वदेवस्तुते देवि कालिके त्वां नमाम्यह ॥ इति श्रीरुद्र
यामले कालीकल्पे वैरिनाशकवचं संपूर्णम् ॥ ॥